अमनस्कखण्डम् - योगविषयकम् -

Ed. & pub. by Pt. ज्येष्ठाराम शर्मा at गुर्जर प्रेस.

Mumbai, 1958 Vikram era.

Indira Gandhi National
Centre for the Arts

57
1001

294.5436

(4)

1216

॥ श्रीः ॥

# अमनस्कखण्डम्

## योगविषयकम् ।

तदिदम् 28/06/08

पण्डितज्येष्ठारामशर्मणा

Indira Gandhi National
Centre for the Arts

गुर्जरमुद्रायन्त्रे मुद्रयित्वा प्रकाशितम् ।

मुम्बई.

शके १८२३ सं० १९५८

1216

# अमनस्कखण्डम् ।

तत्र प्रथमोऽध्यायः-

लययोगपरिच्छेदनामा ।

DATA ENTERED
Date 28/06/08

KALANIDH
Rare Book Collecti
IGNCA
ACC No.: R-468
Date: 26.3.08

ॐ

वामदेव उवाच ।

प्रणम्य शिरसा देवं वामदेवः कृताञ्जलिः ।
जीवन्मुक्तपदोपायं कथयस्वेति पृच्छति ॥ १ ॥

ईश्वर उवाच ।

परं ज्ञानमहं वच्मि येन तत्त्वं प्रकाशते ।
येन संछिद्यते सर्वं मायापाशादिबन्धनम् ॥ २ ॥
आधारादिषु पत्रेषु सुषुम्णादिषु नाडिषु ।
प्राणादिषु शरीरेषु परं तत्त्वं न तिष्ठति ॥ ३ ॥
तत्प्रयोगरताः केचित्केचिद् ध्यानविमोहिताः ।
जपेन केचित्क्लिश्यन्ति नैव जानन्ति तारकम् ॥ ४ ॥

न मीमांसातर्कग्रहगणितसिद्धान्तपठनै-
र्न वेदैर्वेदान्तैः स्मृतिभिरभिधानैरपि न च ।
तथापि च्छन्दोव्याकरणकविताल‌ङ्कृतिमयै-
र्मुने तत्त्वावाप्तिर्निजगुरुमुखादेव विदिता ॥ ५ ॥
काषायग्रहणं कपालधरणं केशावलीलुञ्चनं
पाषण्डावृतभस्मचीवरजटाधारित्वमुन्मत्तता ।
नग्नत्वं निगमागमादिकविता गोष्ठी सभाभ्यन्तरे
सर्व्वं चोदरपूरणाय पठनं न श्रेयसः कारणम् ॥ ६ ॥
द्वेषोच्चाटनमारणादिकुहकैर्मन्त्रैः प्रपञ्चोद्गमः
सर्व्वाभ्यासविचित्रबन्धकरणान्न ज्ञानबोधः परम् ।
ध्यानं देहपदेषु नाड़िषु षडाधारेषु चित्तभ्रम-
स्तस्मात्तत्सकलं मनोविरचितं त्यक्त्वामनस्कं भजेत् ॥ ७ ॥
अन्ये च जगतो भावा ये च तिष्ठन्त्यनेकधा ।
तेषां तु लक्षणेनापि परं तत्त्वं न गीयते ॥ ८ ॥

अन्तश्चेतो बहिश्चक्षुरधः स्थाप्य सुखासनम् ।
समत्वं च शरीरस्य ध्यानमुद्रेति कथ्यते ॥ ९ ॥

अथाहं वच्मि मोक्षाय ज्ञानं रागजितां नृणाम् ।
निष्कलं निष्प्रपञ्चं यत्परं तत्त्वं तदुच्यते ॥ १० ॥
व्योमादिभूतनिर्मुक्तं बुद्धीन्द्रियविवर्जितम् ।
त्यक्तं चिन्तादिभावैर्यत्परं तत्त्वं तदुच्यते ॥ ११ ॥

यस्मादुत्पद्यते सर्वं यस्मिन्सर्वं प्रतिष्ठितम् ।
यस्मिन्विलीयते सर्वं परं तत्त्वं तदुच्यते ॥ १२ ॥
भावाभावविनिर्मुक्तं नाशोत्पत्तिविवर्जितम् ।
सर्वसङ्कल्पनातीतं परं तत्त्वं तदुच्यते ॥ १३ ॥
अनाकारमविच्छिन्नमग्राह्यमचलं ध्रुवम् ।
सर्वोपाधिविनिर्मुक्तं सर्वकामविवर्जितम् ॥ १४ ॥

---

प्रथमं पृथिवीतत्त्वं जलतत्त्वं द्वितीयकम् ।
तेजस्तत्त्वं तृतीयं स्याद्वायुतत्त्वं चतुर्थकम् ॥ १५ ॥
आकाशं पञ्चमं तत्त्वं मनः षष्ठमुदीरितम् ।
सप्तमं परमं तत्त्वं यो जानाति स मोक्षभाक् ॥ १६ ॥
परं तत्त्वं समाख्यातं जन्मबन्धविनाशनम् ।

---

तस्याभ्यासं प्रवक्ष्यामि येन संजायते लयः ॥ १७ ॥
विविक्तदेशेषु च सन्निविष्टः समासतः किञ्चिदुपेत्य पश्चात् ।
बहुप्रमाणःस्थिरदृक् श्लथाङ्गश्चिन्ताविहीनोऽभ्यसनं कुरुष्व ॥ १८ ॥
सुखासने समासीनस्तत्त्वाभ्यासं समाचरेत् ।
सदाभ्यासेन तत्कुर्यात् परं तत्त्वप्रकाशनम् ॥ १९ ॥
ब्रह्माण्डं पञ्चभूतेषु पञ्चभूतमयी तनुः ।
सर्वभूतमयं चेति त्यक्त्वा नास्तीति भावयेत् ॥ २० ॥
न किञ्चिन्मनसा ध्यायेत्सर्वचिन्ताविवर्जितः ।
स बाह्याभ्यन्तरे योगी जायते तत्त्वसन्मुखः ॥ २१ ॥

तत्त्वस्य सन्मुखे जाते त्वमनस्कं प्रजायते ।
चिन्तादिविलये जाते पवनस्य लयो भवेत् ॥ २२ ॥
मनःपवनयोर्नाशादिन्द्रियार्थान्विमुञ्चति ।
इन्द्रियार्थैर्यदा मुक्तो बाह्यज्ञानं न जायते ॥ २३ ॥
बाह्यज्ञाने विनष्टे च ततः सर्वसमो भवेत् ।
यदा सर्वसमो जातो भवेद्व्यापारवर्ज्जितः ॥ २४ ॥
परे ब्रह्मणि सम्बद्धो योगी प्राप्तलयस्तदा ।

---

सदाभ्यासकृतां चैव यः परो जायते लयः ॥ २५ ॥
तस्याहं कथयिष्यामि लक्षणं युक्तचेतसः ।
सुखं दुःखं न जानाति शीतोष्णं च न विन्दति ॥ २६ ॥
विचारं चेन्द्रियार्थानां न वेत्ति हि लयं गतः ।
न च जीवन्मृतो वापि न पश्यति न मीलति ॥ २७ ॥
निर्जीवः काष्ठवत्तिष्ठेल्लयस्थश्चाभिधीयते ।
निर्व्वातस्थापितो दीपो भासते निश्चलो यथा ॥ २८ ॥
जगद्व्यापारनिर्मुक्तो निश्चलो निर्मलः परः ।
शब्दाद्यैर्विषयैस्त्यक्तो लयस्थो दृश्यते तदा ॥ २९ ॥
प्रक्षिप्तं लवणं तोये क्रमाद्वै लीयते यथा ।
लवणं तोयसम्पर्काद्यथा तोयमयं भवेत् ॥ ३० ॥
मनोऽपि ब्रह्मसम्पर्कात्तथा ब्रह्ममयं भवेत् ।
यथा क्षारमयत्वेन प्राप्यते लवणं स्वकम् ॥ ३१ ॥
ब्रह्मज्ञानमयत्वेन निर्वाणं मनसस्तथा ।

Indira Gandhi National Centre for the Arts

घृतात्पृथग्विरहितं घृतं लीनं घृते यथा ॥ ३२ ॥
तत्त्वे लीनस्तथा योगी पृथग्भावं न विन्दति ।
निमेषश्वासपलकैर्नाडीभिः प्रहरैर्दिनैः ॥ ३३ ॥
मासैः संवत्सरैः कालैर्लयस्थो यत्पदं व्रजेत् ।

———

श्वासोच्छ्वासात्मकः प्राणः षड्भिः प्राणैः पलं स्मृतम् ॥ ३४ ॥
पलैः षष्टिभिरेव स्याद्घटिका कालसम्मिता ।

———

योगी निमेषमात्रेण लयेन लभते ध्रुवम् ॥ ३५ ॥
स्पर्शनं परतत्त्वस्यचोत्थानं च पुनःपुनः ।
घर्मशान्तिः प्रजायेत मुहुर्निद्रा च मूर्च्छना ॥ ३६ ॥
निमेषषट्कमात्रेण लयेनान्तःस्थयोगिनः ।
श्वासमात्रं लयेनापि तेन प्राणादिवायवः ॥ ३७ ॥
श्वासप्रवाहसम्बन्धाः स्वस्वस्थाने वहन्ति ते ।
श्वासद्वयं लयेनापि कूर्मवातादिवायवः ॥ ३८ ॥
निवर्त्तन्ते च धातूनां बन्धं कुर्वन्ति धातवः ।
चतुःश्वासं लयेनापि सप्तधातुगता रसाः ॥ ३९ ॥
समे पुष्टि प्रकुर्वन्ति धातूनां समवायवः ।
लयेन पलमात्रेण आसनस्थो न खिद्यते ॥ ४० ॥
स्वल्पश्वासो भवेद्योगी स्वल्पोन्मेषयुतस्तथा ।
पलद्वयं लयेनापि हृन्नाड्याश्चालनं भवेत् ॥ ४१ ॥
अव्याहतः स विज्ञेयो न तत्रैव न्यसेन्मनः ।

Indira Gandhi National

चतुःपलप्रमाणेन लयेनानुभवो भवेत् ॥ ४२ ॥
अकस्मान्निपतन्त्येव शब्दः कर्णे शुभाशुभः ।
पलाष्टकं लयेनापि कामस्तस्य निवर्त्तते ॥ ४३ ॥
तथापि नैव जायेत कामिन्यालिङ्गितस्य च ।
कलापादं लयेनापि सुषुम्णामार्गवाहिनी ॥ ४४ ॥
कला पश्चिममार्गेण तस्य भागेन गच्छति ।
घटिकार्द्धं लयेनापि शक्तिः संचलते ध्रुवम् ॥ ४५ ॥
ऊर्ध्वं पश्चिममार्गेण वातरोधेन गच्छति ।
कलाद्वयं लयेनापि शक्तेः सञ्चालनेन च ॥ ४६ ॥
क्षणादुत्पद्यते तस्य मनसः कल्पनं सकृत् ।
चतुःकलालयेनापि निद्राभावोनुवर्तते ॥ ४७ ॥
हृदि स्फुलिङ्गवद्योगी तेजोबिन्दुं प्रपश्यति ।
दिनपादं लयेनापि स्वल्पाहारो भवेन्नरः ॥ ४८ ॥
स्वल्पमूत्रपुरीषत्वं लघुता स्निग्धता तनोः ।
वासरार्द्धं लयेनापि स्वात्मज्योतिः प्रकाशते ॥ ४९ ॥
सूर्यो गोभिरिवोद्दीप्तो योगी विश्वं प्रकाशते ।
दिनमात्रं लयेनापि स्वात्मतत्त्वं प्रकाशते ॥ ५० ॥
इन्द्रियज्ञानविस्तारो ब्रह्माण्डेऽप्यनुवर्त्तते ।
अहोरात्रलयेनापि योगी चर्मासने स्थितः ॥ ५१ ॥
चित्तवृत्तिनिरोधेन गन्धं जानाति दूरतः ।
अहोरात्रद्वयेनापि लयादानन्दमूर्च्छितः ॥ ५२ ॥
दूरादपि रसं वेत्ति योगी सङ्कल्पवर्जितः ।

अहोरात्रत्रयेणापि लयेनान्तःस्थयोगिनः ॥ ५३॥
दूराद्दर्शनविज्ञानं स्वभावेनैव वर्तते ।
अहोरात्रचतुष्केण लयभावसमन्वितः ॥ ५४ ॥
स्पर्शं जानाति योगीन्द्रो दूरादपि न संशयः ।
पञ्चरात्रलयेनापि तस्याप्युत्पद्यते ध्रुवम् ॥ ५५ ॥
दूरश्रवणविज्ञानं मनसाश्चर्य्यकारणम् ।
एतत्पञ्चेन्द्रियज्ञानं महत्स्वानुभवात्मकम् ॥ ५६ ॥
जानाति तेन योगीन्द्रो सकलं विश्ववर्तनम् ।
रात्रिषट्कलयेनापि महाबुद्धिः प्ररोहति ॥ ५७ ॥
यावत्तर्कमयं तस्य विज्ञानं संप्रवर्तते ।
सप्तरात्रलयेनापि परे लीनस्य योगिनः ॥ ५८ ॥
आब्रह्म विश्वनेतृत्वं श्रुतिज्ञानं च वर्तते ।
अष्टरात्रलयेनापि भवेद्योगी निरामयः ॥ ५९ ॥
क्षुत्पिपासादिभिश्चैव सहजस्थो न पीड्यते ।
नवरात्रलयेनापि निर्भेदस्वात्मवर्तनम् ॥ ६० ॥
वाचा सिद्धिर्भवेत्तस्य शापानुग्रहकारिणी ।
दशरात्रलयेनापि योगीन्द्रः स्वात्मनि स्थितः ॥ ६१ ॥
यानि कानि सुगुप्तानि महाचित्राणि पश्यति ।
ततश्चैकादशाहेन लयस्थस्य जयोदयात् ॥ ६२ ॥
मनसा सहितस्यापि गन्तुमिच्छति विग्रहः ।
द्वादशाहलयेनापि भूचरत्वं च सिद्ध्यति ॥ ६३ ॥
निमेषार्द्धप्रमाणेन पर्यटत्येव भूतलम् ।

ततस्त्रयोदशाहेन लयेनापि महाद्भुताम् ॥ ६४ ॥
योगीन्द्रः खेचरीं सिद्धिं लभते चिन्तनादपि ॥
चतुर्दशदिनान्तं च लयस्थो यत्र तिष्ठति ॥ ६५ ॥
अणिमा चैव सिद्धिः स्यादणुत्वं प्राप्यते यथा ।
आत्मन्येवात्मना लीनो योगी षोडश वासरान् ॥ ६६ ॥
लभते महिमासिद्धिं स महारूपधृग्यथा ।
अष्टादशदिनान्तं च लयस्थो यदि तिष्ठति ॥ ६७ ॥
गरिमाख्यां लभेत्सिद्धिं यथा भूभारधृग्भवेत् ।
अभिन्नार्थो लयेनापि पञ्चविंशतिवासरान् ॥ ६८ ॥
लघिमाख्या भवेत्सिद्धिर्यथाणुत्वमभारधृक् ।
द्वाविंशतिदिनान्येवं स्वलक्ष्ये यो लयं गतः ॥ ६९ ॥
प्राप्तिसिद्धिर्भवेत्तस्य प्राप्नोत्येव जगत्स्थितम् ।
परे लयं गतो योगी चतुर्विंशतिवासरान् ॥ ७० ॥
तस्य प्राकाम्यसिद्धिः स्यादीप्सितं लभते यथा ।
तत्रैवास्तं गतं चित्तं षड्विंशतिदिनानि वै ॥ ७१ ॥
लभते जगदीशत्वं येन विश्वगुरुर्भवेत् ।
अष्टाविंशत्यहं यस्य लयस्तिष्ठेत्स्थिरासने ॥ ७२ ॥
वशित्वसिद्धिप्राप्तिः स्याद्येन वश्यं भवेज्जगत् ।
गन्तुमिच्छन्ति ये केचित्परं ब्रह्मपदे लयम् ॥ ७३ ॥
भवन्ति सिद्धयः सर्वास्तेषां विध्वंसकारिकाः ।
मासमेकं लयो यस्य लग्नस्तिष्ठेदखण्डितः ॥ ७४ ॥
न जागर्ति स योगीन्द्रो यावन्मोक्षं स गच्छति ।

पृथ्वीतत्त्वे तु संसिद्धे योगीन्द्रो योगसन्निभः ॥ ७५ ॥
सार्द्धसंवत्सरेणापि लयस्थस्यापि योगिनः ।
तोयतत्त्वस्य सिद्धिः स्यात्तोयतत्त्वमयो भवेत् ॥ ७६ ॥
संवत्सरत्रयेणापि लयस्थस्यापि योगिनः ।
तेजस्तत्त्वस्य सिद्धिः स्यात्तेजस्तत्त्वमयो भवेत् ॥ ७७ ॥
षड्भिः संवत्सरैरेवमखण्डलयमास्थितः ।
वायुतत्त्वस्य सिद्धिः स्याद्वायुतत्त्वमयो हि सः ॥ ७८ ॥
तथा द्वादशभिर्वर्षैर्लयस्थस्य निरन्तरम् ।
व्योमतत्त्वस्य सिद्धिः स्याद्यथा व्योममयो भवेत् ॥ ७९ ॥
चतुर्विंशत्या हि वर्षैर्लयस्थस्य निरन्तरम् ।
शक्तितत्त्वस्य सिद्धिः स्याद्यथा शक्तिमयो हि सः ॥ ८० ॥
ब्रह्माण्डं सकलं पश्येत्पाणिस्थमिव मौक्तिकम् ।
आत्मकायस्वरूपं च निर्धार्याथ यथास्थितम् ॥ ८१ ॥
कायस्थे दृश्यते लोकस्तत्त्वचर्यां समाचरेत् ।
तत्र चर्यां करोत्येवं शक्तितत्त्वक्षयाय च ॥ ८२ ॥
इत्थं क्रमाद्विवृद्धेन लयाभ्यासेन योगिना ।
भुज्यते परमानन्दं भृशं त्वादिमहात्मवत् ॥ ८३ ॥
महाविष्णुमहेशानां प्रलयेष्वपि योगिनाम् ।
नास्ति पातो लयस्थानां महातत्त्वं विवर्तिनाम् ॥ ८४ ॥ ॐ ॥

इति श्रीमहेश्वरप्रोक्तेऽमनस्कखण्डे लययोगपरिच्छेदो नाम
प्रथमोऽध्यायः ॥

Indira Gandhi National Centre for the Arts

## द्वितीयोऽध्यायः-

अमनस्कविवरणंनामा ।

ॐ

### वामदेव उवाच ।

भगवन्देवदेवेश परमानन्द सुन्दर ।
त्वत्प्रसादान्मया लब्धः पूर्वयोगः सविस्तरः ॥ १ ॥
अपरं किं तदाख्याहि भवता यदुदीरितम् ।
बहिर्मुद्रान्वितं पूर्वं बहिर्योगं च तन्मनः ॥ २ ॥

Indira Gandhi National
Centre for the Arts

### श्रीमहेश्वर उवाच ।

अन्तर्मुद्राख्यमपरमन्तर्योगं तदेव हि ।
राजयोगः स कथितः स एव मुनिपुङ्गव ॥ ३ ॥
राजत्वात्सर्वयोगानां राजयोग इति स्मृतः ।
राजन्तं दीप्यमानं तं परमात्मानमव्ययम् ॥ ४ ॥
प्रापयेद्देहिनां यस्तु राजयोगः स कीर्तितः ।
राजयोगस्य माहात्म्यं को वा जानाति तत्त्वतः ॥ ५ ॥
ज्ञानान्मुक्तेः सिद्धिरिति गुरोर्ज्ञानं च लभ्यते ।

अन्तर्योगं बहिर्योगं यो जानाति विशेषतः ॥ ६ ॥
मया त्वयाप्यसौ वन्द्यः शेषैर्वन्द्यस्तु किं पुनः ।
चित्तं बुद्धिरहङ्कारो ऋत्विजः सोमपं मनः ॥ ७ ॥
इन्द्रियाणि दश प्राणा जुहोति ज्योतिर्मण्डले ।
तन्मूलादिन्दुपर्यन्तं विभाति ज्योतिर्मण्डलम् ॥ ८ ॥
योगिभिः सततं ध्येयमणिमाद्यष्टसिद्धिदम् ।
वेदशास्त्रपुराणानि सामान्या गणिका इव ॥ ९ ॥
एकैव शाम्भवी मुद्रा गुप्ता कुलवधूरिव ।
अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ॥ १० ॥
एषा हि शाम्भवी मुद्रा गुप्ता कुलवधूरिव ।
अन्तर्लक्ष्या बहिर्दृष्टिः सर्व्वतन्त्रेषु गोपिता ॥ ११ ॥
आदिशक्तिरुमा चैतां मुद्रां लब्धवती पुरा ।
अधुना जन्मसंस्कारात्त्वमेको लब्धवानिति ॥ १२ ॥
गुह्याद् गुह्यतरा विद्या न देया यस्य कस्यचित् ।
एतज्ज्ञानी वसेद्यत्र स देशः पुण्यभाजनम् ॥ १३ ॥
दर्शनादर्च्चनात्तस्य त्रिःसप्तकुलसंयुताः ।
जना मुक्तिपदं यान्ति किं पुनस्तत्परायणाः ॥ १४ ॥
ऊर्द्ध्वाधःकुण्डलीभेद उन्मन्या चैव संक्रमः ।
अनुसन्धानमात्रेण योगोऽयं सिद्धिदायकः ॥ १५ ॥
ऊर्द्ध्वदृष्टिरधोदृष्टिरूर्द्ध्ववेधस्त्वधःशिराः ।
राधायन्त्रविधानेन जीवन्मुक्तो भविष्यति ॥ १६ ॥

कुलाचाररताः सन्ति गुरवो बहवो मुने ।
कुलाचारविहीनस्तु गुरुरेको हि दुर्लभः ॥ १७ ॥
पुष्पात्प्रकाशते यद्वत्फलं पुष्पप्रणाशनम् ।
देहात्प्रकाशते तद्वत्तत्त्वं देहप्रणाशनम् ॥ १८ ॥
आत्मनस्तत्त्वमज्ञात्वा मूढः शास्त्रेषु मुह्यति ।
गोपः कक्षगते छागे कूपं पश्यति दुर्मतिः ॥ १९ ॥
नमोस्तु गुरवे तुभ्यं सहजानन्दरूपिणे ।
यस्य वाक्यामृतं हन्ति संसारविषमोहनम् ॥ २० ॥
अमृतोद्दीपिनी विद्या निरपाया निरञ्जना ।
अमनस्कैव सा कापि जयत्यानन्ददायिनी ॥ २१ ॥
प्रणष्टोच्छ्वासनिःश्वासप्रध्वस्तविषयग्रहः ।
निश्चेष्टो निर्गतारम्भो ह्यानन्दं याति योगवित् ॥ २२ ॥
उच्छिन्नसर्वसङ्कल्पो निःशेषाशेषचेष्टितः ।
स्वावगम्यो लयः कापि जायते वागगोचरः ॥ २३ ॥
वदन्तो वा परं ब्रह्म बुद्धिमन्तो हि सूरयः ।
स्वावबोधकलालापकुशला दुर्लभा भुवि ॥ २४ ॥
वदन्तो वात्मनो भावं वदन्त्युपनिषद्गिरः ।
रहस्युपदिशन्त्यन्ये स्वयं नानुभवन्ति ते ॥ २५ ॥
विहाय योगशास्त्राणि नानागुरुमतानि च ।
विद्रवः स्वात्मबोधोऽयं सद्यः प्रत्ययकारकः ॥

---

सकलं समनस्कं च निराभासं सदा भज ॥ २६ ॥
दुग्धाम्बुवत्संचलितौ सदैव, तुल्यक्रियौ मानसमारुतौ च ।
यावन्मरुद्वापि मनःप्रवृत्तिस्तत्रैकनाशादपरस्य नाशः ॥ २७ ॥
एकप्रवृत्तावपरप्रवृत्तिरध्यस्तयोश्चेन्द्रियवर्गबुद्धिः ।
विध्वस्तयोर्मोक्षपदप्रसिद्धिस्तत्राप्यसाध्यः पवनस्य नाशः ॥ २८ ॥
षडङ्गयोगस्य निषेवणेन मनोविनाशस्तु गुरुप्रसादात् ।
निमेषमात्रेण तु साध्य एव तस्मान्मनो नाशयतेऽमनस्कात् ॥२९॥
अनश्यतो नश्यति वायुरुग्रस्तस्मात्सुबुद्धीन्द्रियदेहनाशात् ।
अद्वैतबुद्धिः सहजस्थितस्य प्रकाशते सा स्वत एव तस्य ॥ ३० ॥
जित्वा वायुं विविधकरणैः क्लेशमूलैः कथञ्चि-
त्कृत्वा यत्नं निजतनुगताशेषनाडीप्रवाहान् ।
अश्रद्धेयां परपुरगतिं साधयित्वापि नूनं
विज्ञानैकव्यसनसुखिनो नास्ति मोक्षस्य सिद्धिः ॥ ३१ ॥

---

केचिन्मूत्रं पिबन्ति स्वमलमपिहिताः के च लालां गिलन्तः
केचित्कोष्ठप्रतिष्ठा युवतिभगगतं बिन्दुमूर्द्धं नयन्ति ।
केचिद्ग्रासं चरन्तो निखिलतनुशिखा वायुसञ्चारदक्षाः
नैतेषां देहसिद्धिर्विगतिनिजमनोराजयोगादृते स्यात् ॥ ३२ ॥
केचित्तर्कवितर्ककर्कशधियोऽहङ्कारदर्पोद्धताः
केचिज्जातजटा निरन्तरमपि ध्यानैककर्माकुलाः ।
प्रायः प्राणिविमर्दनैकमनसो नानाविकारान्विता

दृश्यन्ते न हि निर्विकारमनसानन्दैकभाजो भुवि ॥ ३३ ॥
एकदण्डत्रिदण्डादि जटाभस्मादिकं तथा ।
केशलुञ्चननग्नत्वं दशाविविधधारणा ॥ ३४ ॥
उन्मत्तत्वत्वाप्रभोज्यत्वपाषण्डव्रतवर्तिनः ।
इत्यादिलिङ्गग्रहणं नानादर्शनदर्शितम् ॥ ३५ ॥
उत्पन्नस्वात्मबोधस्य ह्युदासीनस्य सर्वदा ।
सदाभ्यासरतस्यैव नैकत्र ह्युपपद्यते ॥ ३६ ॥

---

तदा दृष्टिविशेषाश्च विविधान्यासनानि च ।
अन्तःकरणभावाश्च योगिनामुपयोगिनः ॥ ३७ ॥

---

अहङ्कारहृताः केचिज्ज्ञात्वा शास्त्रसमुच्चयम् ।
उपदेशं न जानन्ति न च ग्रन्थशतैरपि ॥ ३८ ॥
सङ्कल्पमूलध्यानादिचिन्ताशतसमाकुलाः ।
क्लेशेनापि न विन्दन्ति प्राप्तव्यं स्थानमिच्छताम् ॥ ३९ ॥

---

वेदान्ततर्कोक्तिभिरागमैश्च नानाविधैः शास्त्रकदम्बकैश्च ।
ध्यानादिभिः सत्करणैर्न गम्यं चिन्तामणिं त्वेकगुरुं विहाय॥४०॥
तस्मान्नूनं सकलविलयो निष्कलाध्यात्मयोगा-
द्वायोर्नाशस्तदनु मनसस्तद्विनाशाच्च मोक्षः ।
सच्चिद्देवं सहजममलं निष्कलं निर्विकारं
प्राप्तुं यत्नं कुरुत कुशलाः पूर्वमेवामनस्कम् ॥ ४१ ॥

अभ्यस्तैः किमु दीर्घकालमनिलैर्व्याधिप्रदैर्दुःखदैः
प्राणायामशतैरनेककरणैर्दुःखात्मकैर्दुर्जयैः ।
यस्मिन्नभ्युदिते विनश्यति बली वायुः स्वयं तत्क्षणा-
त्प्राप्तुं तत्सहजस्वभावमनिशं सेवध्वमेकं गुरुम् ॥ ४२ ॥
दृष्टिः स्थिरा यस्य विनैव दृश्याद्वायुः स्थिरो यस्य विनोवरोधात् ।
चित्तं स्थिरं यस्य विनावलम्बात्स एव योगी स गुरुः स सेव्यः ४३
समनस्कं सुशिष्येषु संक्रम्येन्द्रियजं सुखम् ।
निवारयन्ते ते वन्द्या गुरवोऽन्ये प्रतारकाः ॥ ४४ ॥
गुरुणा दर्शिते तत्त्वे दर्शनात्तन्मयो भवेत् ।
विविक्तम्पश्य आत्मानं मन्यते नात्र संशयः ॥ ४५ ॥
यथा सिद्धरसस्पर्शात्ताम्रं भवति काञ्चनम् ।
गुरूपदेशश्रवणाच्छिष्यस्तत्तन्मयो भवेत् ॥ ४६ ॥

---

विविक्ते विजने देशे पवित्रेऽतिमनोहरे ।
सुखासने समासीनः पश्चात्किञ्चित्समाश्रितः ॥ ४७ ॥
सुखस्थापितसर्वाङ्गः सुस्थिरात्मा सुनिश्चलः ।
लोहदण्डप्रमाणेन कृतदृष्टिः समभ्यसेत् ॥ ४८ ॥
शिथिलीकृतसर्वाङ्ग आनखाग्राशिखाग्रतः ।
स बाह्याभ्यन्तरं सर्वचिन्ताचेष्टाविवर्जितः ॥ ४९ ॥
यथा भवेदुदासीनस्तथा तत्त्वं प्रकाशते ।
स्वयं प्रकाशिते तत्त्वे स्वानन्दस्तत्क्षणाद्भवेत् ॥ ५० ॥

आनन्देन च सन्तुष्टः सदाभ्यासरतो भवेत् ।
सदाभ्यासे स्थिरीभूते न विधिर्नैव च क्रमः ॥ ५१ ॥
न किञ्चिच्चिन्तयेद्योगी सदा शून्यपरो भवेत् ।
नकिञ्चिच्चिन्तनादेव स्वयं तत्त्वं प्रकाशते ॥ ५२ ॥
वाङ्मनःकायसंक्षोभान्प्रयत्नेन विवर्जयेत् ।
दिशाऽऽचान्तमिवात्मानं सुस्थिरं धारयेत्सदा ॥ ५३ ॥
यावत्प्रयत्नलेशोऽस्ति यावत्संकल्पकल्पना ।
श्रेयस्त्वमनसा प्राप्तं तावत्तत्त्वस्य का कथा ॥ ५४ ॥
औदसीन्यामृतैर्येन वर्द्धमानेन योगिना ।
उन्मीलितमनोमूलो जगद्वृक्षः पतिष्यति ॥ ५५ ॥
सदा जाग्रदवस्थायां सुप्तवद्योऽवतिष्ठते ।
श्वासोच्छ्वासविहीनस्तु निश्चितं मुक्त एव सः ॥ ५६ ॥
स्वप्नजागरणोपेता जन्तवो मुक्ततां गताः ।
योगिनस्तत्त्वसम्पन्ना न जाग्रति न शेरते ॥ ५७ ॥
स्वप्ने चिदंशशून्यत्वं जागरे विषयग्रहः ।
स्वप्नजागरणातीतमतस्तत्त्वं विदुर्बुधाः ॥ ५८ ॥
भावाभावद्वयातीतं स्वप्नजागरणातिगम् ।
मृत्युजीवननिर्मुक्तं तत्त्वं तत्त्वविदो विदुः ॥ ५९ ॥
यथा सुप्तोत्थितः कश्चिद्विषयान्प्रतिपद्यते ।
जागर्ति च तथा योगी योगनिद्रेक्षितो तदा ॥ ६० ॥
सर्वतो विद्वता दृष्टिः समुद्भूता शनैःशनैः ।

परं तत्त्वंविनिर्देश्यं पश्यत्यात्मानमात्मना ॥ ६१ ॥
निद्रादौ जागरस्यान्ते यो भाव उपजायते ।
तं भावं भावयेद्योगी निश्चितं मुक्त एव सः ॥ ६२ ॥
प्रथमं निभृता दृष्टिः संलग्ना यत्रकुत्रचित् ।
स्थिरीभूता च तत्रैव विनश्यति शनैःशनैः ॥ ६३ ॥
प्रसह्य संकल्पपरम्पराणां संछेदने सन्ततसावधाना ।
आलम्बनाशादपचीयमाना शनैःशनैः शान्तिमुपैति दृष्टिः ॥ ६४ ॥
यथायथा समभ्यासान्मनसः स्थिरता भवेत् ।
वायुवाक्कायदृष्टीनां स्थिरता च तथातथा ॥ ६५ ॥
दृश्यं पश्यति येन पश्यति शनैराघ्रेयमाजिघ्रति
भक्ष्यं भक्षयति श्रुतिप्रियकरं श्राव्यं तथा शृण्वते ।
स्पर्शं स्पर्शयते गिरीन्वनशिखामरूयं मनोज्ञक्रमाद्
द्वैताख्यस्य पदस्य तत्त्वपदवीं प्राप्तस्य सद्योगिनः ॥ ६६ ॥
यदा यच्च यथा यस्मात्स्थिरं भवति मानसम् ।
तदा तत्र तथा तस्मान्न तु चान्यं कदाचन ॥ ६७ ॥
यत्रयत्र मनो याति न निवार्यं मनस्ततः ।
निवारितं लयं याति वार्यमाणं तु वर्त्तते ॥ ६८ ॥
यथा निरङ्कुशो हस्ती कामं प्राप्य निवर्तते ।
अवारितं मनस्तद्वत्स्वयमेव विलीयते ॥ ६९ ॥
निवार्यमाणं यत्नेन धर्त्तुं यत्र हि शक्यते ।
तन्निष्ठता क्रमेणैव मारुतस्य जयोदयात् ॥ ७० ॥

Centre for the Arts

दुर्निवार्यं मनस्तावत्तत्त्वं यावन्न विन्दति ।
विदिते तु परे तत्त्वे मनो नौस्तम्भकाकवत् ॥ ७१ ॥
यथातूली तुलाधारं चञ्चलं कुरुते स्थिरम् ।
जाते सौख्ये सदाभ्यासान्मनोवृत्तिस्तथात्मनि ॥ ७२ ॥
निष्पन्नाखिलभावशून्यनिभृतस्वात्मस्थितिस्तत्क्षणा-
न्निश्चेष्टः शवपादपाणिकरणो लीनाविकारस्थितिः ।
निर्मूलप्रविनष्टमारुततया निर्जीवकाष्ठोपमो
निर्वातस्थितदीपवत्सहजवान्पार्श्वस्थितैर्दृश्यते ॥ ७३ ॥
निक्षिप्ते कतके विहाय कलुषं यद्वद्भवेन्निर्मलं
निर्वातस्थितनिस्तरङ्गमुदकं स्वस्थस्वभावं परम् ।
तद्वत्सर्वमिदं विहाय सकलं देदीप्यते निष्कलं
Centre for the Arts
तत्त्वं तत्सहजस्वभावममलं जाताऽमनस्कं ध्रुवम् ॥ ७४ ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्तौ निर्विषयं स्मृतम् ॥ ७५ ॥
मनोदृश्यमिदं सर्वं यत्किञ्चित्सचराचरम् ।
मनसोप्युन्मनीभावो द्वैतभावं प्रचक्षते ॥ ७६ ॥
जायमानमनस्कं स्यादुदासीनस्य तिष्ठतः ।
मृदुत्वं च परत्वं च शरीरस्योपजायते ॥ ७७ ॥
अमनस्केक्षणं लोभकामक्रोधादिबन्धनम् ।
नष्टान्तःकरणस्तम्भे देहगेहं श्लथं भवेत् ॥ ७८ ॥
सहजेनामनस्केन मनःशल्यं वियोजयेत् ।

आतपत्रमिवास्तम्भं शरीरं शिथिलायते ॥ ७९ ॥
अमनस्कखनित्रेण समूलोन्मूलने कृते ।
अन्तःकरणशल्ये तु सुखी संजायते मुने ॥ ८० ॥
कदलीव महामाया समनस्केन्द्रियच्छिदा ।
अमनस्कफलं सूत्वा सर्वदैव विनश्यति ॥ ८१ ॥
इन्द्रियग्रामपद्योः श्वासनिःश्वासपक्षयोः ।
संछिन्नयोर्मनःपक्षी स्थिरः सन्नावसीदति ॥ ८२ ॥
श्वाससूत्रसमोपेतमिन्द्रियालयसङ्कुलम् ।
त्रोटयित्वा मनोजालं मीनवज्जायते सुखी ॥ ८३ ॥
प्रशान्तेन्द्रियसंघाते शुद्धबुद्धिसमन्वितः ।
प्राणापानौ ततो जित्वा मनःशक्रः सुखी भवेत् ॥ ८४ ॥
गुणत्रयमयीं रज्जुं सुदृढामात्मबन्धनीम् ।
अमनस्कक्षुरेणैव छित्वा मोक्षमवाप्नुयात् ॥ ८५ ॥
यथा संह्रियते सर्वमस्तं गच्छति भास्करे ।
कर्मजालं तथा सर्वममनस्के विलीयते ॥ ८६ ॥
इन्द्रियग्राहनिर्मुक्ते निर्धूते निर्मलामृते ।
अमनस्कह्रदे स्नातः परामृतमुपाश्नुते ॥ ८७ ॥

---

इत्युक्तमेतत्सहजामनस्कं शिष्यप्रबोधाय शिवेन साक्षात् ।
नित्यं ततो निष्कलनिष्प्रपञ्चं वाचामवाच्यं स्वयमेव वेद्यम् ॥८८॥
चित्ते च निश्चलीभूते यस्मान्मोक्षः प्रजायते ।
तस्मान्मोक्षं स्थिरीकुर्यादौदासीन्यपरायणः ॥ ८९ ॥

---

चतुर्विधा मनोऽवस्था विज्ञातव्या मनीषिभिः ।
विक्षिप्तं च गतायातं सुश्लिष्टं च सुलीनकम् ॥ ९० ॥
विक्षिप्तं तामसं प्रोक्तं राजसं तु गतागतम् ।
सुश्लिष्टं सात्त्विकं प्रोक्तं सुलीनं गुणवर्जितम् ॥ ९१ ॥
विक्षिप्तं च गतायातं विकल्पं विषयग्रहम् ।
सुश्लिष्टं च सुलीनं च विकल्पविषयापहम् ॥ ९२ ॥
ततोऽभ्यस्तेन योगेन निरालम्बो भवेद्यदि ।
तदा समरसीभूय परमानन्द एव सः ॥ ९३ ॥
अभ्यासतो मनः पूर्वं विक्षिप्तं चलमुच्यते ।
ततश्चलाचलं किञ्चित्स्वानन्दं च गतागतम् ॥ ९४ ॥
स्वानन्दनिश्चलं चेतस्ततः सुश्लिष्टमुच्यते ।
अतीव निश्चलीभूतं स्वानन्दं च सुलीनकम् ॥ ९५ ॥

---

एवम्भूतस्य कर्माणि पुण्यापुण्यानि सर्वशः ।
प्रयान्ति नैव लिम्पन्ति क्रियमाणानि साधुना ॥ ९६ ॥
उत्पन्नसहजानन्दसदाभ्यासरतः स्वयम् ।
सर्वसंकल्पसंयुक्तः स विद्वान्कर्म संत्यजेत् ॥ ९७ ॥
ये तु विद्यार्थविज्ञाने विद्वांस इति कीर्तिताः ।
आत्मतत्त्वं न जानन्ति दर्वी पाकरसं यथा ॥ ९८ ॥
सांसारिकक्रियासक्तं ब्रह्मज्ञोऽस्मीति वादिनम् ।
कर्मब्रह्मोभयोर्भ्रष्टं तं त्यजेदन्त्यजं यथा ॥ ९९ ॥

---

वृथा चैव परित्यक्तकर्मकाण्डवितन्त्रिताः ।
पाषण्डाः पण्डितम्मन्याः न ते किमपि जानते ॥ १०० ॥
न कर्माणि त्यजेद्योगी कर्मभिस्त्यज्यते ह्यसौ ।
कर्मणां मूलभूतस्य संकल्पस्यैव नाशतः ॥ १०१ ॥
यथायथा समभ्यासात्सङ्कल्पविलयो भवेत् ।
योगिनो भवति श्रेयान्कर्मत्यागस्तदातदा ॥ १०२ ॥

---

दातॄणां वै कुशलिनां सततं मोक्षमिच्छताम् ।
श्रद्धावतां सुशिष्याणां शास्त्रमेतत्प्रकाशयेत् ॥ १०३ ॥
शास्त्रमेतत्प्रयत्नेन सदाभ्यस्यं मुमुक्षुभिः ।
यस्य धारणमात्रेण स्वयं तत्त्वं प्रकाशते ॥ १०४ ॥
ॐकारत्रिविधैर्विचित्रकरणैः प्राप्यश्च वायोर्जय-
स्तेजश्चिन्तनमन्तरालकलनाच्छून्याम्बरालम्बनम् ।
त्यक्त्वा सर्वमिदं कलेवरगतं यत्रा मनोविभ्रमं
देहातीतमवाच्यमेकममनस्काख्यं बुधैः सेव्यताम् ॥ १०५ ॥
न दिवा जागर्त्तव्यं सुप्तव्यं नैव रात्रिभागेऽपि ।
रात्र्यावहनि च सततं [illegible]तव्यं योगिना [illegible] नित्यम् ॥ १०६ ॥
[illegible]सहजसुस्थितपुरुष[illegible] हि कालभेदोऽस्ति ।
[illegible]यनवर्जितचिन्मात्रानन्दनस्थानात् ॥ १०७ ॥
[illegible]भ्यासात्स्वयं तत्त्वं प्रकाशते ।
[illegible]उपदेशादिना विना ॥ १०८ ॥

शुद्धाभ्यासस्य शान्तस्य सदैव गुरुसेवनात् ।
गुरुप्रसादात्तत्रैव तत्त्वज्ञानं प्रकाशते ॥ १०९ ॥

प्रकाशात्मिकया शक्त्या स्वप्रकाशः प्रभाकरः ।
प्रकाशयति यो विश्वं काशतेऽसौ प्रकाशकः ॥ ११० ॥

सर्वमेतच्चिदाकाशं ब्रह्मेति घननिश्चये ।
स्थितिं याति शमं याति जीवो निःस्नेहदीपवत् ॥ १११ ॥

एतत्परावारविदो वदन्ति तपस्विनो ज्ञानसमाधियुक्ताः ।
अनादिविज्ञानमजं पुराणं सोऽहं परं ब्रह्म जगत्समस्तम् ॥ ११२ ॥

Indira Gandhi National Centre for the Arts

ॐ

इत्यमनस्कखण्डे महेश्वरवामदेवसंवादेऽमनस्कविवरणं नाम द्वितीयोऽध्यायः ॥

समाप्तोऽयं ग्रन्थः

294.536 AMA

IGNCA RA
ACC. No.